# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – स्वामिनारायणवेदान्तः (S) **कोड – CC-3.5.10** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ३०/११/२०१६ सन्दर्भग्रन्थः – छान्दोग्योपनिषत् (१-४ अध्यायाः) भद्रेशदासविरचितभाष्ययुता

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत। ०८**

(१) स एष रसानां रसतमः परमः परार्ध्योऽष्टमोऽयमुद्गीथः॥

(२) अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम॥

(३) अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत। ०८**

(१) छान्दोग्योपनिषदः शान्तिमन्त्रं विलिख्य तस्य यथाभाष्यम् अर्थं विशदयत

(२) यथाभाष्यम् उद्गीथविद्यायाः सारांशं प्रकटयत।

**प्रश्नः – ३ निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम् ०२**

(१) प्रणवः। (२) उद्गीथः।

**प्रश्नः – ४ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत। ०२**

(१) कति सामभागाः? के च ते? (३) छान्दोग्योपनिषत् कस्मिन् वेदे अन्तर्भवति?

(२) साम्नः का गतिः ? (४) उद्गीथ इति शब्दे कति अक्षराणि ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु मन्त्रेषु कस्योश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत। ०८**

(१) ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनं रुद्राणां माध्यन्दिनं सवनमादित्यानां च विश्वेषां च देवानं तृतीयसवनम्॥

(२) अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम॥

(३) एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविंशेन परमादित्याज्जयति तन्नाकं तद्विशोकम्॥

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत। ०८**

(१) यथा भाष्यं "त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति" इति मन्त्रं व्याख्यात।

(२) यथाभाष्यं मधुविद्यां स्पष्टयत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्। ०४**

(१) उपनिषच्छब्दार्थः। (३) स्वरादीनां देवताः।

(२) त्रयो धर्मस्कन्धाः। (४) सामोपासना।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) सर्वविषयसामोपासने का विद्या?

(२) सामवेदस्य ऋत्विक् कः ?

(३) "ब्रह्मसंस्थः" इत्यस्य कः अर्थ?

(४) कः देवमधु ?

(५) छान्दोग्योपनिषदि कति अध्यायाः सन्ति ?

(६) रुद्राणां सवनं कदा भवति?

(७) वसूनां सवनं कदा भवति?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु मन्त्रेषु कस्योश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च

(२) तावानस्य महिमा ततो ज्यायाँश्च पुरुषः।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥

(३) मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) यथाभाष्यं शाण्डिल्यविद्यां प्रतिपादयत।

(२) यथाभाष्यं संवर्गविद्यां विशदयत।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) चतुष्पदा गायत्री।

(२) पञ्च ब्रह्मपुरुषाः।

(३) "तज्जलान्" इति पदस्य अर्थः।

(४) "सत्यसङ्कल्पः" इति पदस्य अर्थः।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) सर्वकर्मा सर्वकामः कः ?

(२) "भारूपः" इति पदस्य कः अर्थः ?

(३) सर्वं खल्विदं किम् अस्ति?

(४) माध्यन्दिनं सवनं किं छन्दस्कम्?

(५) जानश्रुतिः कस्य पुत्रः आसीत्?

(६) सयुग्वा कः आसीत्?

(७) सत्यकामः कस्य अपत्यम् आसीत्?

***

## Answer Key

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ६** | गुणाः - ७०

विषयः – स्वामिनारायणवेदान्तः (S) | **कोड – CC-3.5.10** | समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ३०/११/२०१६ | सन्दर्भग्रन्थः – छान्दोग्योपनिषत् (१-४ अध्यायाः) भद्रेशदासविरचितभाष्ययुता

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – ४**

१. पञ्च। हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनभेदेन।

२. स्वरः।

३. सामवेदे

४. त्रीण्यक्षराणि।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ८**

१. हिङ्कारः।

२. उद्गाता

३. साक्षादक्षरब्रह्मणि प्रतिष्ठितः। ब्राह्मीं स्थितिं प्राप्तः ब्रह्मरूपः।

४. आदित्यः

५. अष्टौ

६. माध्यन्दिनसवनम्

७. प्रातःसवनम्।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः – ११**

१. भूतानि पृथिवी शरीरं हृदयम् चेति चतुर्भिः पादैर्युक्ता चतुष्पदा

२. आदित्यचन्द्रमसोऽग्निपर्जन्याकाशाख्याः।

३. तस्मात् जायते, तस्मिन् लीयते, तस्मिन् अनिति इति।

४. सत्यः अबाधितोऽवितथः सङ्कल्पः यस्येति।

**प्रश्नः – १२**

१. परमात्मा

२. दीपनस्वभावः

३. ब्रह्म

४. त्रिष्टुप्छन्दस्कम्

५. जनश्रुतस्य अपत्यम्।

६. रैक्वः

७. जबालायाः